# षष्ठः पाठः–लौहतुला

## प्रश्न 1:

**एकपदेन उत्तरं लिखत-**

(क) वणिक्पुत्रस्य किं नाम आसीत्?

(ख) तुला कैः भक्षिता आसीत्?

(ग) तुला कीदृशी आसीत्?

(घ) पुत्रः केन हृतः इति जीर्णधनः वदति?

(ङ) विवदमानौ तौ द्वावपि कुत्र गतौ?

### उत्तर 1:

(क) जीर्णधनः

(ख) मूषकैः

(ग) लौहघटिता

(घ) श्येनेन

(ङ) राजकुलम्

## प्रश्न 2:

**अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत-**

(क) देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः किं व्यचिन्तयत्?

(ख) स्वतुलां याचमानं जीर्णधनं श्रेष्ठी किम् अकथयत्?

(ग) जीर्णधनः गिरिगुहाद्वारं कया पिधाय गृहमागतः?

(घ) स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं किम् अवदत्?

(ङ) धर्माधिकारिणः जीर्णधनश्रेष्ठिनौ कथं तोषितवन्तः?

### उत्तर 2:

(क) देशान्तरं गन्तुमिच्छन् वणिक्पुत्रः व्यचिन्तयत् "यत्र स्ववीर्यतः भोगाः भुक्ताः वसन्ति तत्र यः विभवहीनः वसेत् सः पुरुषाधमः अस्ति।"

(ख) स्वतुलां याचमानं जीर्णधनं श्रेष्ठी कथयत्–"भोः! त्वदीया तुला मूषकैः भक्षिता" इति।

(ग) जीर्णधनः गिरिगुहाद्वारं बृहच्छिलया (बृहत् शिलया) आच्छाद्य गृहमागतः।

(घ) स्नानानन्तरं पुत्रविषये पृष्टः वणिक्पुत्रः श्रेष्ठिनं अवदत्–"नदीतटात् सः बालः श्येनेन हृतः" इति।

(ङ) धर्माधिकारिणः जीर्णधनश्रेष्ठिनौ परस्परं संबोधय तुला-शिशु-प्रदानेन तोषितवन्तः।

## प्रश्न 3:

**स्थूलपदान्यधिकृत्य प्रश्ननिर्माणं कुरुत-**

(क) **जीर्णधनः** विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्।

(ख) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय **अभ्यागतेन** सह प्रस्थितः।

(ग) वणिक् गिरिगुहां **बृहच्छिलया** आच्छादितवान्।

(घ) सभ्यैः तौ परस्परं संबोध्य **तुला-शिशु-प्रदानेन** सन्तोषितौ।

### उत्तर 3:

(क) **कः** विभवक्षयात् देशान्तरं गन्तुमिच्छन् व्यचिन्तयत्?

(ख) श्रेष्ठिनः शिशुः स्नानोपकरणमादाय **केन** सह प्रस्थितः?

(ग) वणिक् गिरिगुहां **कथम्/कया** आच्छादितवान्?

(घ) सभ्यैः तौ परस्परं संबोध्य **कथं** सन्तोषितौ?

## प्रश्न 4:

**अधोलिखितानां श्लोकानाम् अपूर्णोऽन्वयः प्रदत्तः, पाठमाधृत्य तं पूरयत-**

(क) यत्र देशे अथवा स्थाने स्ववीयर्तः भोगाः भुक्ता .......................................................।

(ख) राजन्! यत्र लौहसहस्रस्य तुलां मूषकाः खादन्ति ..................................................।

### उत्तर 4:

(क) यत्र देशे अथवा स्थाने स्ववीयर्तः भोगाः भुक्ता **तस्मिन् विभवहीनः यः वसेत् स पुरुषाधामः**।

(ख) राजन्! यत्र लौहसहस्रस्य तुलां मूषकाः खादन्ति **तत्र श्येनः बालम् हरेत् अत्र संशयः न**।

## प्रश्न 5:

**तत्पदं रेखाङ्कितं कुरुत यत्र-**

(क) ल्यप् प्रत्ययः नास्ति

विहस्य, लौहसहस्रस्य, संबोध्य, आदाय

(ख) यत्र द्वितीया विभक्तिः नास्ति

श्रेष्ठिनम्, स्नानोपकरणम्, सत्त्वरम्, कार्यकारणम्

(ग) यत्र षष्ठी विभक्तिः नास्ति

पश्यतः, स्ववीर्यतः, श्रेष्ठिनः सभ्यानाम्

## उत्तर 5:

(क) ल्यप् प्रत्ययः नास्ति
विहस्य, **लौहसहस्रस्य**, संबोध्य, आदाय

(ख) यत्र द्वितीया विभक्तिः नास्ति
श्रेष्ठिनम्, स्नानोपकरणम्, **सत्त्वरम्**, कार्यकारणम्

(ग) यत्र षष्ठी विभक्तिः नास्ति
पश्यतः, **स्ववीर्यतः**, श्रेष्ठिनः सभ्यानाम्

## प्रश्न 6:

**सन्धिना सन्धिविच्छेदेन वा रिक्तस्थानानि पूरयत-**

(क) श्रेष्ठ्याह = ...................... + आह
(ख) ...................... = द्वौ + अपि
(ग) पुरुषोपार्जिता = पुरुष + ......................
(घ) ...................... = यथा + इच्छया
(ङ) स्नानोपकरणम् = ...................... + उपकरणम्
(च) ...................... = स्नान + अर्थम्

## उत्तर 6:

(क) श्रेष्ठ्याह = **श्रेष्ठी** + आह
(ख) **द्वावपि** = द्वौ + अपि
(ग) पुरुषोपार्जिता = पुरुष + **उपर्जिता**
(घ) **यथेच्छया** = यथा + इच्छया
(ङ) स्नानोपकरणम् = **स्नान** + उपकरणम्
(च) **स्नानार्थम्** = स्नान + अर्थम्

## प्रश्न 7:

**समस्तपदं विग्रहं वा लिखत-**

| **विग्रहः** | | **समस्तपदम्** |
|---|---|---|
| (क) स्नानस्य उपकरणम् | = | ...................... |
| (ख) ............. ............. | = | गिरिगुहायाम् |

(ग) धर्मस्य अधिकारी = ......................
(घ) ............. ............. = विभवहीना:

## उत्तर 7:

| विग्रह: | | समस्तपदम् |
|---|---|---|
| (क) स्नानस्य उपकरणम् | = | **स्नानोपकरणम्** |
| (ख) **गिरे गुहायाम्** | = | गिरिगुहायाम् |
| (ग) धर्मस्य अधिकारी | = | **धर्माधिकारी** |
| (घ) **विभवेन हीना:** | = | विभवहीना: |

## प्रश्न 7 (अ):

**यथापेक्षम् अधोलिखितानां शब्दानां सहायतया ''लौहतुला'' इति कथाया: सारांशं संस्कृतभाषया लिखत-**

| | | | |
|---|---|---|---|
| वणिक्पुत्र: | स्नानार्थम् | लौहतुला | अयाचत् |
| वृत्तान्तं | ज्ञात्वा | श्रेष्ठिनं | प्रत्यागत: |
| गत: | प्रदानम् | | |

## उत्तर 7 (अ):

एकदा जीर्णधन: नाम **वणिक्पुत्र:** धनोपार्जनाम देशान्तरं गन्तुम् अचिन्तयत्। तस्य गृहे एका **लौहतुला** आसीत्। वणिक्यपुत्र: लोहतुलाम् श्रेष्ठिन: गृहे रक्षित्वा स: देशान्तरं प्रसिथत:। देशान्तरं भ्रान्त्वा पुन: स्वपुरम् **प्रत्यागत्य** स: **तुलामयाचत्**। स: श्रेष्ठी उवाच–"तुला तु मूषकै: भक्षिता।" तत: जीर्णधन: श्रेष्ठिन: पुत्रेण सह **स्नानाथम् गत:**। स्नात्वा स: श्रेष्ठिपुत्र गिरिगुहायां, प्रक्षिप्य, तद्द्वारं च ब्रहच्छिलया आच्छाद्य गृहम् आगत:।

तत: स: वाणिक् **श्रेष्ठिनं** स्वपुत्रविषये अपृच्छत्। वणिक उवाच "नदीतटात् स: श्यनेन हृत:" इति। स: शीघ्रमाह–"श्येन: बालं हर्तुं न शक्नोति। अत: समर्पय मे सुतम्।

जीर्णधन: अवदत् यत्र लौहसहस्त्रस्य तुलां मूषका: खादन्ति तत्र बालकं: श्येनेन हरेत्।"

एवं विवदमानौ तो राजकुलं गतौ। सर्वं **वृत्तान्तं ज्ञात्वा** धर्माधिकारिभि: तुला-शिशु-**प्रदानेन** तौ द्वौ सन्तोषितौ।